**हडि** पु० हठ-इन् पृषो० । पशुमारणसाधने काष्ठयन्त्रभेदे (हाँड़िकाठ) शब्दर० । [शब्दमा० स्त्रियां ङीप् ।

**हडिक** पुंस्त्री० हठ-इकक् पृषो० । नीचजातिभेदे (हाड़ि)

**हड्ड** न० हठ-ड डस्य नेत्त्वम् पृषो० । अस्थि (हाड) । संज्ञायां कन् । नीचजातिभेदे (हाड़ि) शब्दमा० । इन् हड्डिरप्यत्र । [शब्दच० ।

**हड्डज** न० हड्डात् जायते जन-ड । अस्थिसारे मज्जायां

**हड्डिक** पु० हडिक-स्वार्थे क । (हाड़ि) जातिभेदे स्त्रियां जातित्वात् ङीष् । स च यथा: "मद्यस्थागडालकन्यायां लेटवीर्य्येण शौनक ! । बभूवतुस्तौ द्वौ पुत्रौ हड्डिकः शौण्डिकस्तथा" ब्रह्मवै० ब्र०ख० १०अ० ।

**हण्डा** स्त्री हन-डा डस्य नेत्त्वम् । १हट्टति मृत्पात्रभेदे (हाँड़ा) नाट्योक्तौ नीचसम्बोधने अव्य० । हञ्जावत् आवन्तोऽपि शेषार्थे स्त्री भरतः ।

**हण्डिका** स्त्री क्षुद्रा हण्डा कन् । क्षुद्रे मृत्पात्रे (हाँड़ि) ।

**हण्डिकासुत** पु० हण्डिकायाः सुत इव । क्षुद्रे मृण्मये हण्डिकाकारे (हाँड़ि) त्रिका० । [अमरः ।

**हण्डे** अव्य० हन-डे डस्य नेत्त्वम् । नाट्योक्तौ नीचसम्बोधने

**हत** त्रि० हन-क्त । १नाशिते २प्रतिहते ३प्रतिबद्धे ४आशा रहिते अमरः ।५गुणिते च । भावे क्त ।६हनने ७गुणने च न० ।

**हतक** त्रि० हत इव नष्टप्रायत्वात् कन् । नष्टप्राये (मड़ा) ।

**हताश** त्रि० हता आशा यस्य । १आशाशून्ये २निर्दये ३पिशुने च मेदि० ४बन्ध्ये शब्दर० ।

**हति** स्त्री हन-भावे क्तिन् । १हनने २मारणे ३व्याघाते ४अपकर्षे ५गुणने च ।

**हत्नु** पु० हन-क्त्नु । १व्याधौ २शस्त्रे च उणा० ।

**हत्या** स्त्री हन-भावे क्यप् । १मारणे बधे प्राणवियोगानुकूलव्यापारे "ब्रह्महत्या सुरापानम्" स्मृतिः २हन.. च ।

**हथ** त्रि० हन-क्थ । विषसे उणादि० ।

**हद** विष्ठोत्सर्गे भ्वा० आ० अक० अनिट् । हदते अहत्त ।

**हद्दा** स्त्री ताजकोक्ते पञ्चवर्गीबलानयनोपयोगिनि ग्रहभेदस्वामिकराशिभेदस्यांशभेदे यथोक्तं नील०ता०

"मेषेऽङ्गतर्काष्टशरेषुभागा जीवास्फुजित्सौम्यशनैश्चराणाम् । वृषेऽष्टषण्णागशरानलांशाः शुक्रज्ञजीवार्किकुजेशहद्दाः । युग्मे षडङ्गेषुनगाङ्गभागाः सौम्यास्फुजिज्जीवकुजार्किहद्दाः । कर्केऽद्रितर्काङ्गनगाब्धिभागाः कुजास्फुजिज्ज्ञेज्यशनैश्वराणाम् । सिंहेऽङ्गभूताद्रिरसाङ्गभागा देवेज्यशुक्रार्किबुधारहद्दाः । स्त्रियां नगाशाब्धिनगाग्निभागाः सौम्योशनोजीवकुजार्किनाथाः । तुले रसाष्टाद्रिनगाग्निभागाः कोणज्ञजीवास्फुजिदारनाथाः । कीटे नगाब्ध्यष्टशराङ्गभागाः भौमास्फुजिज्ज्ञेज्यशनैश्वराणाम् । चापे रवीष्वब्धिपञ्चवेदा जीवास्फुजिज्ज्ञारशनैश्वराणाम् । मृगे नगाद्र्यष्टयुगस्त्रुतीनां सौम्ये ज्यशुक्रार्किकुजेशहद्दाः । कुम्भे नगाङ्गाद्रिशरेषुभागाज्ज्ञशुक्रजीवारशनैश्वराणाम् । मीनेऽर्कवेदानलनन्दपक्षाः सितेज्यसौम्यारशनैश्वराणाम् । त्रिंशत्क्रमे विंशतिरुत्क्रमे स्वे हद्देऽक्ष५चन्द्राद्दशकं द्रिकाणे" ।

**हन** बधे गतौ च भ्वा० प०सक० अनिट् । हन्ति प्रणिहन्ति प्रहन्व (खवः) जहि अवधीत् । जघान कर्मणि अघानि अवधि । णिच् घातयति जिघांसति जघंन्यते" "कुम्भ हन्ति कृशोदरि" इत्यादावालङ्कारिकाः गतौ निहतार्थतामाहुः ।

अभि+आघातभेदे केनचित् पदार्थेन संयोगभेदे अभिघातः ।

अव+तुषाद्यपसरणार्थव्यापारभेदे व्रीहीनवहन्ति । [घातः ।

आ+केनचित् पदार्थेन संयोगानुकूलव्यापारे आहन्ति आस्वाङ्गकर्मणि अकर्मत्वे च आत्म० वक्ष आहते ।

प्रति आ+प्रत्याघाते प्रतिबन्धे प्रत्याहन्ति । [व्याघातः

वि+आ परस्परेण विरोधे विशेषेण ताडिते च व्याहन्ति

उद्+ऊर्ध्वं गतौ उत्तोल्य हनने च ।

उप+उद्+आरम्भे उपोद्घातः आरम्भार्थः सङ्गतिभेदः ।

नि+निशेषेण हनने स्वरान्तरघातेन उदात्तस्वरसम्पादने च

निर्+निःशेषेण हनने वज्रादिशब्दे च । "निर्घाते भूमिचलने मनुः ।

परा+प्रतिबन्धे निरोधे ।

प्रति+प्रतिरोधे प्रतिकूलगतौ च । [घ्नन्ति योधाः ।

वि+अति+परस्परहनने व्यतिहारेऽपि न आत्म० । व्यतिसम्+सम्यक् हनने समूहभावे अक० ।

**हन्** अव्य०हन-भावे विच् । १रूपोक्तौ २अनुनये च मेदि० । कर्त्तरि विच् । २हननकर्त्तरि त्रि० वृत्रहा ब्रह्महा ।

**हन** त्रि० हन कर्त्तरि अच् । हननकर्त्तरि त्रि० कौ० ।

**हनन** न० हन-भावे ल्युट् "स्यात् प्राणवियोगफलव्यापारो हननं स्मृतम्" इत्युक्ते १व्यापारभेदे २गुणने च । [रत्नमा० ।

**हनील** पु०हन-इन् ङीप् हन्यां लीयते ली-ड । केतकीवृक्षे

**हनु(नू)** पुंस्त्री०हन-उन् स्त्रीत्वे वा-ऊङ् । १कपोलद्वयोपरिस्थे मुखभागभेदे २हट्टविलासिन्यां स्त्री अमरः ।